जले इति।) प्लवः। इत्यमरः।१।१०।११॥ भेला माड़ इत्यादि भाषा। अङ्कपालिः। शनिः। चित्रम्। चिता इति भाषा। (कोलन्ति आलिङ्गन्त्यङ्गान्यत्र। कुल+अधिकरणे हलश्चेति घञ्।) क्रोड़म्। इति मेदिनी। देशविशेषः। इति शब्दरत्नावली॥ अस्त्रभेदः। इति धरणी॥ वर्णसङ्करजातिविशेषः। (यथा, हरिवंशे।३२।१२३।

"पाण्ड्यस्य केरलस्यैव कोलस्योलस्य पार्थिव!।
तेषां जनपदाः स्फीताः पाण्ड्याश्चोलाः सकेरलाः"॥)

स तु लेटात् तीवरकन्यायां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ शस्त्रधारिम्लेच्छजातिविशेषः। स च पूर्व्वं क्षत्रिय आसीत् सगरराजेनासौ वेदयागादावनधिकारी कृतः। एतद्विवरणं हरिवंशे १४ अध्याये द्रष्टव्यम्॥

(अयन्तु कोलः ययातिवंशीयस्य राज्ञो दुष्मन्तस्य पौत्रेष्वन्यतमः॥ इदानीं पार्व्वत्यः असभ्यजातिविशेषः। उत्कलदेशादुत्तरभागे ह्यस्य वसतिः। इयन्तु कोलजातिः सत्यप्रिया सरलप्रकृतिः आतिथ्यसत्कारप्रिया चेति उच्यते॥)

कोलकं, क्ली, (कोल+संज्ञायां कन्। कुल्+ह्रादित्वात् वुन् वा।) गन्धद्रव्यविशेषः। काँकला इति भाषा। मरिचम्। इत्यमरः।२।९।३६॥

कोलकः, पुं, (कुल्+कर्त्तरि ण्वुल् ह्रादित्वात् वुन् वा।) अङ्कोठवृक्षः। इति राजनिर्घण्टः॥ बङ्कवारवृक्षः। इति जटाधरः॥

कोलकन्दः, पुं, (कोल इव कन्दोऽस्य।) महाकन्दविशेषः। तत्पर्य्यायः। कृमिघ्नः २ पत्रलः ३ वस्त्रपत्रलः ४ पुटालुः ५ सपुटः ६ पुटकन्दः ७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कृमिदोषनाशित्वम्। वान्तिविच्छर्द्दिशमनत्वम्। विषदोषनिवारणत्वञ्च। इति राजनिर्घण्टः॥

कोलकर्कटिका, स्त्री, (कोल इव कर्कटिका।) मधुखर्ज्जूरिका। इति राजनिर्घण्टः॥

कोलदलं, क्ली, (कोलं वदरीफलं तद्वद्दलमस्य।) नखीनामगन्धद्रव्यम्। इत्यमरः।२।४।१३०॥ (नखीशब्देऽस्य गुणादयो ज्ञातव्याः॥)

कोलनाशिका, स्त्री, (कोलस्य शूकरस्य नाशिका नाशिनी। नश्+ण्वुल् टाप् अत इत्वम्।) वह्निशिखवृक्षः। इति हारावली॥

कोलपुच्छः, पुं, (कोलस्य शूकरस्य पुच्छ इव पुच्छोऽस्य।) कङ्कपक्षी। इति हारावली॥

कोलमूलं, क्ली, (कोलस्य वदरीफलस्य मूलवत् मूलमस्य। यद्वा, कोलं वदरीफलमिव मूलमस्य।) पिप्पलीमूलम्। इति राजनिर्घण्टः॥

कोलम्बकः, पुं, (कुल्+बाहुलकात् अम्बच्। ततः संज्ञायां कन्।) वीणायाः कायः। इत्यमरः।१।७।७॥ स तु तन्त्रीदण्डादिसमुदायः शरीरम्। अलावुदण्डककुभसमुदायस्तन्त्रीहीन इत्यन्ये। इति भरतः॥

कोलवल्ली, स्त्री, (कोलो वराहः तल्लोमवत् वल्ली। वराहलोमतुल्यशूकावत्त्वात् तथात्वम्।) गजपिप्पली। इत्यमरः।२।४।९७॥ चव्यम्। इति राजनिर्घण्टः॥ (अस्याः पर्य्याया यथा,—

"चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली।
कपिवल्ली कोलवल्ली श्रेयसीवशिरश्च सा"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

कोलशिम्बी, स्त्री, (कोलस्य शूकरस्य पादाकारा शिम्बिरस्याः। ततो वा ङीष्।) लताविशेषः। आलकुसी इति भाषा। तत्पर्य्यायः। कृतफला २ खड्गा ३ शूकरपादिका ४ काकाण्डोला ५ दधिपुष्पा ६ काकाण्डा ७ पर्य्यङ्कपादिका ८। अस्या गुणाः। वायुनाशित्वम्। गुरुत्वम्। उष्णत्वम्। कफपित्तकारित्वञ्च। इति राजनिर्घण्टः॥ (तत्पर्य्यायगुणाः। यथा, भावप्रकाशे।

"कोलशिम्बी कृष्णफला तथा पर्य्यङ्कपालिका।
कोलशिम्बी समीरघ्नी गुर्व्वी रुक्षा कफवातहृत्।
शुक्राभिसादहृद्बल्या रुचिकृत् बद्धविड्गुरुः"॥)

कोला, स्त्री, (कुल्+ज्वलादित्वात् णः ततष्टाप्।) कोलिवृक्षः। इति शब्दरत्नावली॥ पिप्पली। (अस्याः पर्य्याया यथा,—

"पिप्पली चपला शौण्डी वैदेही मागधी कणा।
कृष्णोपकुल्या मगधी कोला स्यात्तिक्ततण्डुला"॥)

चव्यम्। इति मेदिनी॥ (अस्याः पर्य्याया यथा,—

"चव्यं तेजोवती कोला नाकुली च विकोषणा"॥

इति वैद्यकरत्नमालायाम्॥)

कोलाञ्चः, पुं, देशविशेषः। इति शब्दरत्नावली॥ तत्र पुर कान्यकुब्जम्॥

कोलाहलः, पुं, (कोल एकीभूताव्यक्तशब्दविशेषः तं आहलति आलिखतीति। हल् विलेखने+अच्।) बहुविधदूरगाव्यक्तध्वनिः। तत्पर्य्यायः। कलकलः २। इत्यमरः।१।६।२५॥ कालकीलः ३। इति शब्दरत्नावली॥ (यथा, रामायणे।३।३१।४१।

"ततो हलहलाशब्दः पुनः कोलाहलो महान्।
महान् राक्षसनादश्च पुनस्तूर्य्यरवो महान्"॥)

कोलिः पुं स्त्री, (कुल्+"सर्व्वधातुभ्य इन्"। उणां ४।११७। इतीन्।) वृक्षविशेषः। कुलगाछ इति भाषा। तत्पर्य्यायः। कर्कन्धुः २ वदरी ३। इत्यमरः।२।४।३६॥ कर्कन्धूः ४ वदरः ५ कोली ६ कोला ७ कुवली ८। इति तट्टीकायां भरतः॥ कोलः ९। इति तट्टीका सारसुन्दरी॥ (यथा, गारुड़े १९४ अध्याये।

"जातीपत्रं कोलिपत्रं तथाचैव मनःशिला।
एभिश्चैव कृता वर्त्तिर्वदरामौ महेश्वर!।
धूमपानं कासहरं नात्र कार्य्या विचारणा"॥)

कोली, स्त्री, (कोलति पीनत्वेन जायते वर्द्धते वा। कुल्+अच्+गौरादित्वात् ङीष्। यद्वा, कोलि+वा ङीष्।) कोलिवृक्षः इत्यमरटीकायां भरतः॥ (अस्याः पर्य्याया यथा,—

"पुंसि स्त्रियान्तु कर्कन्धुवदरी कोलमित्यपि।
फेनिलं कुवलं घोण्टा सौवीरं वदरं महत्।
अजप्रिया कुहा कोली विषमोभयकण्टका"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

न्यग्रोधादिगणे व्यवहारोऽस्य यथा,—

"कोली कदम्बविरला मधुकं मधूकम्"॥

इति सूत्रस्थाने पञ्चदशेऽध्याये वाभटेनोक्तम्॥)

कोल्या, स्त्री, (कोलमर्हतीति यत्।) पिप्पली। इति रत्नमाला॥

कोविदः, त्रि, (कुङ् शब्दे विच् कौः वेदः तं वेत्ति जानातीति। विद्+"इगुपधेति"।३।१।१३५। इति कः।) पण्डितः। इत्यमरः।२।७।५॥ (यथा, भागवते।१।१२।२९।

"इति राज्ञ उपादिश्य विप्रा जातककोविदाः।
लब्धोपचितयः सर्व्वे प्रतिजग्मुः स्वकान् गृहान्"॥)

कोविदारः, पुं, (कुं भुवं विदृणाति विदारयति भूमिं विदार्य्योद्भवतीत्यर्थः। दॄ+"कर्म्मण्यण्"।३।२।१। इति अण्। ततः पृषोदरात् साधुः।) रक्तकाञ्चनवृक्षः। तत्पर्य्यायः। चमरिकः २ कुद्दालः ३ युगपत्रकः ४। इत्यमरः।२।४।२२॥ काञ्चनारः ५ कणकारकः ६ कान्तपुष्पः ७ करकः ८ कान्तारः ९ यमलच्छदः १० काञ्चनालः ११ ताम्रपुष्पः १२ कुदारः १३ रक्तकाञ्चनः १४। इति जटाधरः॥ विदलः १५। इति शब्दरत्नावली॥ अपि च।

"काञ्चनालः काञ्चनको गण्डारिः शोणपुष्पकः"॥

अथ कचनारभेदः।

"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।
कुण्डली ताम्रपुष्पश्चाश्मान्तकः स्वल्पकेशरी॥
काञ्चनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत्।
कृमिकुष्ठगुदभ्रंशगण्डमालाव्रणापहः॥
कोविदारोऽपि तद्वत्स्यात् तयोः पुष्पं लघु स्मृतम्।
रूक्षं संग्राहि पित्तास्रप्रदरक्षयकासनुत्"॥

इति भावप्रकाशः। अस्य गुणाः। कषायत्वम्। संग्राहित्वम्। व्रणरोपणत्वम्॥ दीपनत्वम्। कफवातमूत्रकृच्छ्रनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पुष्पगुणाः। धारकत्वम्। रुचिकारित्वम्। रक्तपित्तरोगे सुपथ्यत्वञ्च। इति राजवल्लभः॥ (यथा, पाकशास्त्रे।

"कोविदारकलिकातिकोमला
तक्रसिद्धविलतैलपाचिता।
हिङ्गुवासकसुवासवासिता
वेसवारलुलितातिमोनदा"॥

पारिजातः। हरिवंशे कोविदारस्य व्युत्पत्तिकथने एतद्विवृतिर्यथा।१२४।७०-७१।

"कोऽप्ययं दारुरित्याहुरजानन्तो यतो जनाः।
कोविदार इति ख्यातस्ततः स सुमहातरुः॥
मन्दारः कोविदारश्च पारिजातश्च नामभिः।
स वृक्षो ज्ञायते दिव्यो यस्यैतत् कुसुमोत्तमम्"॥)

कोषः, पुं, (कुष्यते संश्लिष्यते। कुश संश्लेषणे+घञ्कर्त्तरि चेति अधिकरणादौ घञ्।) अण्डम्। इति शब्दरत्नावली॥ कुष्यते आकृष्यते आयस्थानेभ्यः कोषः। कुष ग निष्कर्षे घञ् कोषो मूर्द्धन्यान्तः तालव्यान्त इत्यन्ये। इति भरतः। कृताकृतं हेमरूप्यम्। तत्पर्य्यायः। हिरण्यम् २। इत्यमरः।२।९।९१॥ कृताकृतं हेम-